1. **विलोमपदानि मेलयत-** [4]

I.

| (क) | (ख) |
|---|---|
| चतुरः | नेतुम् |
| आनेतुम् | सेवक |
| निर्गच्छति | मूर्ख |
| स्वामी | प्रविशति |

**Ans. :**

| (क) | (ख) |
|---|---|
| चतुरः | मूर्ख |
| आनेतुम् | नेतुम् |
| निर्गच्छति | प्रविशति |
| स्वामी | सेवक |

2. **निर्देशानुसारं लकार परिवर्तनं कुरुत-** [10]

I. अहं शिक्षकाय धनं ददामि। (लुटलकारे) ________

**Ans. :** अहं शिक्षकाय धनं दास्यामि।

II. परिश्रमी जनः धनं प्राप्स्यति। (लट्लकारे) ________

**Ans. :** परिश्रमी जनः धनं प्राप्नोति।

III. स्वामी उच्चैः वदति। (लङ्लकारे) ________

**Ans. :** स्वामी उच्चैः अवदत्।

IV. अजीजः पेटिकां गृह्णाति। (लुट्लकारे) ________

**Ans. :** अजीजः पेटिकां ग्रहीष्यति।

V. त्वम् उच्चैः पठसि। (लोट्लकारे) ________

**Ans. :** त्वम् उच्चैः पठ।

VI. अहं तुभ्यं सर्वं धनं दास्यामि। – (लट्लकारे)

**Ans. :** अहं तुभ्यं सर्वं धनं ददामि।

VII. सः आकाशं पश्यति। – (लङ्लकारे)

**Ans. :** सः आकाशं अपश्यत्।

VIII. अजीज! त्वम् वस्तुद्यम् आनयति। – (लोटलकारे)

**Ans. :** अजीज! त्वम् वस्तुद्वयम् आनय।

IX. अजीजः सफलः अभवत्। – (लुटलकारे)

**Ans. :** अजीजः सफलः भविष्यति।

X. अजीजः कार्यकुशलः आसीत्। – (लट्लकारे)

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**Ans. :** अजीजः कार्यकुशलः अस्ति।

3. **सूचनाम् अनुसर्य लिखतु-** **[10]**

I. कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारम् अङ्गस्य कार्यं लिखन्तु ।
यथा – नयनं – पश्यति ।
(क) मुखम् – __________ (चलति, हसति, वदति)
(ख) पादः – __________ (लिखति, चलति, पश्यति)
(ग) कर्णः – __________ (हसति, वदति, शृणोति)
(घ) नासिका – __________ (आघ्राणं करोति, नृत्यति, धावति)

**Ans. :** (क) मुखम् – वदति
(ख) पादः – चलति
(ग) कर्णः – शृणोति
(घ) नासिका – आघ्राणं करोति

II. कोष्ठकात् समुचितां संख्यां चित्वा रिक्तस्थानं पूरयन्तु।
(क) मम __________ शिरः अस्ति । (एकम्, अनेकं, चत्वारि)
(ख) मम __________ पादौ स्तः । (त्रयः, द्वौ, पञ्च)
(ग) मम __________ केशाः सन्ति । (दश, अष्ट, बहवः)
(घ) मम __________ दन्ताः सन्ति । (चत्वारः, अष्टाविंशतिः, द्वात्रिंशत्)

**Ans. :** (क) मम एकम् शिरः अस्ति ।
(ख) मम द्वौ पादौ स्तः ।
(ग) मम बहवः केशाः सन्ति ।
(घ) मम अष्टाविंशतिः दन्ताः सन्ति ।

III. कोष्ठकात् समुचितं क्रियापदं चित्वा उदाहरणानुसारं शरीराङ्गस्य नाम लिखन्तु ।
यथा - पश्यति - नयनम्।
(क) शृणोति – __________ । (गुल्फः, चिबुकम्, कर्णः)
(ख) धावति – __________ । (पादद्वयम्, हस्तद्वयम्, नयनद्वयम्)
(ग) नमति – __________ । (शिरः, कूर्परः, जङ्घा)
(घ) सूचयति – __________ । (अङ्गुली, नखः, चरणः)

**Ans. :** (क) शृणोति – कर्णः ।
(ख) धावति – पादद्वयम् ।
(ग) नमति – शिरः ।
(घ) सूचयति – अंगुली ।

IV. कोष्ठकात् समुचितं पदं चिन्वा वाक्यानि 'रचयन्तु।
(क) अहं __________ गायनं करोमि ।(पादेन, नासिकया, मुखेन)
(ख) अहं __________ धावनं करोमि ।(पादाभ्यां, ललाटेन, कूर्परेण)
(ग) अहं __________ आघ्राणं करोमि ।(नखैः, नासिकया, चरणेन)
(घ) अहं __________ श्रवणं करोमि ।(कर्णाभ्याम्, नासिकया, अङ्गुष्ठैः)

**Ans. :** (क) अहं मुखेन गायनं करोमि ।
(ख) अहं पादाभ्यां धावनं करोमि ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ग) अहं नासिकया आघ्राणं करोमि ।
(घ) अहं कर्णाभ्याम् श्रवणं करोमि ।

V. वाक्यं शुद्धम् अशुद्धं वा इति सूचयन्तु
(क) अहं कर्णाभ्यां भोजनं करोमि । (शुद्ध / अशुद्धम् )
(ख) अहं नासिकाद्वारा श्वासं स्वीकरोमि । (शुद्धम् / अशुद्धम्)
(ग) अहम् अङ्गुष्ठैः गणनां करोमि । (शुद्धम् / अशुद्धम्)
(घ) अहं नयनाभ्यां श्रवणं करोमि । (शुद्धम् / अशुद्धम्)

**Ans. :** (क) अशुद्धम्
(ख) शुद्धम्
(ग) शुद्धम्
(घ) अशुद्धम्

*** बहुविकल्पी प्रश्नाः** **[10]**

4. माधवः कस्य कारणेन चलति?
(A) पादस्य (B) हस्तस्य (C) मुखस्य (D) उदरस्य

**Ans.:** (A) पादस्य

5. सः केन गृहकार्यं करोति?
(A) कण्ठेन (B) कर्णेन (C) हस्तेन (D) नेत्रेण

**Ans. :** (C) हस्तेन

6. माधवः कस्य उपदेशं श्रुत्वा ज्ञानं वर्धयति?
(A) मित्रस्य (B) शिक्षकस्य (C) पितुः (D) भ्रातुः

**Ans. :** (B) शिक्षकस्य

7. माधवः केन भोजनं करोति?
(A) कर्णेन (B) पादेन (C) उदरेण (D) मुखेन

**Ans. :** (D) मुखेन

8. अहं काभ्यां पश्यामि?
(A) नेत्राभ्याम् (B) कर्णाभ्याम् (C) पादाभ्याम् (D) हस्ताभ्याम्

**Ans.:** (A) नेत्राभ्याम्

9. माधवः किं श्रुत्वा आनन्दम् अनुभवति?
(A) कलहम् (B) वार्ताम् (C) सङ्गीतम् (D) उपदेशम्

**Ans. :** (C) सङ्गीतम्

10. अहं मुखेन किं करोमि?
(A) भोजनम् (B) भाषणम् (C) श्रवणम् (D) चलनम्

**Ans. :** (B) भाषणम्

11. भगिनी कुङ्कुमं कुत्र धरति?
(A) कण्ठे (B) हस्ते (C) नयने (D) ललाटे

Get More Learning Materials Here : CLICK HERE www.studentbro.in

Ans. : (D) ललाटे

12. 'झटिति' इति पदस्य कोऽर्थः?

(A) शीघ्रम्  (B) दूरम्  (C) मन्दम्  (D) सहसा

Ans.: (A) शीघ्रम्

13. उदरेण पाचनात् अहं किं प्राप्नोमि?

(A) आनन्दम्  (B) ज्ञानम्  (C) शक्तिम्  (D) धनम्

Ans. : (C) शक्तिम्

14. **गद्यांशं पठित्वा प्रश्नान् उत्तरत-** **[6]**

I. अजीजं दृष्ट्वा स्वामी चकितः भवति। स्वामी शनैः शनैः पेटिकाम् उद्घाटयति। पेटिकायां लघुपात्रद्वयम् आसीत्। प्रथमं सः एकं लघुपात्रम् उद्घाटयति। सहसा एका मधुमक्षिका निर्गच्छति। तस्य च हस्तं दशति। स्वामी उच्चै वदति-"अहह!।" द्वितीय लघुपात्रम् उद्घाटयति। एका अन्या मक्षिका निर्गच्छति। सः ललाटे दशति। पीडितः सः अत्युच्चैः चीत्करोति–"आः" इति।

अजीजः सफलः आसीत्। स्वामी तस्मै अवकाशस्य वेतनस्य च पूर्णं धनं ददाति।

**I. एकपदेन उत्तरत**

(क) अजीजं दृष्ट्वा कः चकितः? ____________

(ख) स्वामी काम् उद्घाटयति? ____________

**II. पूर्णवाक्येन उत्तरत**

(क) अन्या मधुमक्षिका किं करोति?

**III. भाषिककार्यम्**

(क) 'नीचैः' इति पदस्य विलोमं लिखत।

(ख) "विस्मितः' इति पदस्य पर्याय लिखत।

Ans. : I. (क) स्वामी (ख) पेटिकाम्

II. (क) अन्या मधुमक्षिका ललाटे दशति।

III. (क) उच्चैः । (ख) चकितः।

* **चित्रं दृष्ट्वा संस्कृतपदं लिखत।** **[5]**

15.



Ans. : नेत्रम्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

16.



**Ans. :** उदरम्

17.




**Ans. :** चरणः/पादः

18.



**Ans. :** हस्तः

19.



**Ans. :** मुखम्

----- -----

Get More Learning Materials Here : CLICK HERE www.studentbro.in